শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীস্কন্দপুরাণে

# ॥শ্রী লক্ষ্মী চতুর্ৱিংশতি স্তোত্রম্॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী লক্ষ্মী চতুর্ৱিংশতি স্তোত্রম্॥

দেৱা ঊচুঃ
নমঃ শ্রিযৈ লোকধাত্র্যৈ ব্রহ্মমাত্রে নমো নমঃ।
নমস্তে পদ্মনেত্রাযৈ পদ্মমুখ্যৈ নমো নমঃ॥ ১॥

প্রসন্নমুখপদ্মাযৈ পদ্মকান্ত্যৈ নমো নমঃ।
নমো বিলৱৱনস্থাযৈ ৱিষ্ণুপত্ন্যৈ নমো নমঃ॥ ২॥

ৱিচিত্রক্ষৌমধারিণ্যৈ পৃথুশ্রোণ্যৈ নমো নমঃ।
পক্ববিলৱফলাপীনতুঙ্গস্তন্যৈ নমো নমঃ॥ ৩॥

সুরক্তপদ্মপত্রাভকরপাদতলে শুভে।
সুরত্নাঙ্গদকেযূরকাঞ্চীনূপুরশোভিতে॥ ৪॥

যক্ষকর্দমসংল্লিপ্তসর্ৱাঙ্গে কটকোজ্জ্বলে॥ ৫॥

মাঙ্গল্যাভরণৈশ্চিত্রৈর্মুক্তাহারৈর্ৱিভূষিতে।
তাটঙ্কৈরৱতংসৈশ্চ শোভমানমুখাম্বুজে॥ ৬॥

পদ্মহস্তে নমস্তুভ্যং প্রসীদ হরিৱল্লভে।
ঋগ্যজুস্সামরূপাযৈ ৱিদ্যাযৈ তে নমো নমঃ॥ ৭॥

প্রসীদাস্মানকৃপাদৃষ্টিপাতৈরালোকযাব্ধিজে।
যে দৃষ্টাস্তে ত্বযা ব্রহ্মরুদ্রেন্দ্রত্বং সমাপ্নুযুঃ॥ ৮॥

শ্রীশুক উৱাচ
ইতি স্তুতা তদা দেৱৈর্ৱিষ্ণুৱক্ষসস্থলালযা।
ৱিষ্ণুনা সহ সংদৃশ্যা রমা প্রীতাৱদতসুরান্॥ ৯॥

শ্রীরুৱাচ
সুরারীন্সহসা হত্বা স্বপদানি গমিষ্যথ।
যে স্থানহীনাঃ স্বস্থানাদ্ ভ্রংশিতা যে নরা ভুৱি॥ ১০॥

www.prapatti.com

তে মামনেন স্তোত্ৰেণ স্তুত্বা স্থানমৱাপ্নুযুঃ।
অশ্বত্থৈৰ্বিলৱপত্ৰৈৰ্মামৰ্চযন্তি নৰা ভুৱি॥ ১১ ॥

স্তোত্ৰেণানেন যে দেৱা নৰা যুষ্মতকৃতেন ৱৈ।
ধৰ্মাৰ্থকামমোক্ষাণামাকৰাস্তে ভৱন্তি ৱৈ॥ ১২ ॥

ইদং পদ্মসৰো দেৱা যে কেচন নৰা ভুৱি।
প্ৰাপ্য স্নানঙ্কৰিষ্যন্তি মাংস্তুত্বা ৱিষ্ণুৱল্লভাম্॥ ১৩ ॥

তেপি শ্ৰিযং দীৰ্ঘমাযুৰ্ৱিদ্যাং পুত্ৰান্সুৱৰ্চসঃ।
লব্ধৱা ভোগাংশ্চ ভুক্তৱান্তে নৰা মোক্ষমৱাপ্নুযুঃ॥ ১৪ ॥

ইতি দত্ত্বা ৱৰং দেৱী দেৱেন সহ ৱিষ্ণুনা।
আৰুহ্য গৰুডেশানং ৱৈকুণ্ঠস্থানমাযযৌ॥ ১৫ ॥

॥ ইতি শ্ৰী লক্ষ্মী চতুৰ্বিংশতি স্তোত্ৰং সংপূৰ্ণম ॥